# महाकवि कालिदासविरचितं
# श्यामळादण्डकम् ॥

माणिक्यवीणामुपलालयन्तीं
मदालसां मञ्जुळवाग्विलासाम् ।
माहेन्द्रनीलद्युतिकोमळाङ्गीम्
मातङ्गकन्यां मनसा स्मरामि ॥

चतुर्भुजे चन्द्रकलावतंसे
कुचोन्नते कुङ्कुमरागशोणे ।
पुन्ड्रेक्षुपाशाङ्कुशपुष्पबाण–
हस्ते नमस्ते जगदेकमातः॥

माता मरकतश्यामा मातङ्गी मदशालिनी ।
कुर्यात्कटाक्षं कल्याणी कदम्बवनवासिनी ॥

जय मातङ्गतनये जय नीलोत्पलद्युते ।
जय सङ्गीतरसिके जय लीलाशुकप्रिये ॥

जय जननि सुधासमुद्रान्त हृद्यन्मणिद्वीप संरूढबिल्वाटवीमध्य कल्पद्रुमाकल्प
कादम्बकान्तारवासप्रिये, कृत्तिवासप्रिये, सर्वलोकप्रिये ।
सादरारब्ध सङ्गीतसम्भावनासम्भ्रमालोल नीपस्रगाबद्धचूलीसनाथत्रिके,
सानुमत्पुत्रिके ।
शेखरीभूत शीतांशुरेखामयूखावलीबद्ध सुस्निग्धनीलालकश्रेणिशृङ्गारिते,
लोकसम्भाविते ।
कामलीलाधनुःसन्निभ भ्रूलतापुष्पसन्दोहसन्देहकृल्लोचने, वाक्सुधासेचने ।
चारुगोरोचनापङ्ककेलीललामाभिरामे, सुरामे, रमे ।
प्रोल्लसद्वालिका मौक्तिकश्रेणिका चन्द्रिकामण्डलोद्भासलावण्यगण्डस्थलन्यस्त
कस्तूरिकापत्ररेखासमुद्भूत सौरभ्यसम्भ्रान्तभृङ्गाङ्गनागीत सान्द्रीभवन्मन्त्रतन्त्रीस्वरे,

सुस्वरे,भास्वरे ।
वल्लकीवादनप्रक्रियालोल तालीदलाबद्धताटङ्कभूषाविशेषान्विते, सिद्धसम्मानिते ।
दिव्यहालामदोद्वेल हेलालसच्चक्षुरान्दोलन श्रीसमाक्षिप्तकर्णैकनीलोत्पले,
पूरिताशेषलोकाभिवाञ्छाफले, श्रीफले ।
श्वेदबिन्दूल्लसत्फाललावण्यनिष्यन्दसन्दोहसन्देहकृन्नासिकामौक्तिके,
सर्वविश्वात्मिके, कालिके ।
मुग्धमन्दस्मितोदारवक्त्रस्फुरत्पूगताम्बूलकर्पूरखण्डोत्करे, ज्ञानमुद्राकरे,
सर्वसम्पत्करे, पद्मभास्वत्कर, श्रीकरे।
कुन्दपुष्पद्युतिस्निग्धदन्तावलीनिर्मलालोल कल्लोलसम्मेलनस्मेरशोणाधरे,
चारुवीणाधरे, पक्वबिम्बाधरे ॥१
सुललितनवयौवनारम्भचन्द्रोदयोद्वेललावण्यदुग्धार्णवाविर्भवत्कम्बुबिम्बोकभृत्कन्धरे सत्कलामन्दिरे, मन्थरे ।
दिव्यरत्नप्रभाबन्धुरच्छन्न हारादिभूषासमुद्योतमानानवद्यांशुशोभे, शुभे ।
रत्नकेयूररश्मिच्छटापल्लव प्रोल्लसद्दोर्लताराजिते, योगिभिः पूजिते ।
विश्वदिङ्मण्डलव्यापिमाणिक्यतेजःस्फुरत्कङ्कणालंकृते, विभ्रमालंकृते, साधकैः सत्कृते ।
वासरारम्भवेलासमुज्जृम्भमाणारविन्दप्रतिद्वन्द्विपाणिद्वये, संततोद्यद्दये, अद्वये ।
दिव्यरत्नोर्मिकादीधितिस्तोमसन्ध्यायमानाङ्गुली पल्लवोद्यन्नखेन्दुप्रभामण्डले,
सन्नताखण्डले, चित्प्रभामण्डले, प्रोल्लसत्कुण्डले ।
तारकाराजिनीकाशहारावलि स्मेरचारुस्तनाभोगभारानमन्मध्यवल्लीवलिच्छेदवीची
समुल्लाससन्दर्शिताकार सौन्दर्यरत्नाकरे, वल्लकीभृत्करे, किंकरश्रीकरे ।
हेमकुम्भोपमोत्तुङ्गवक्षोजभारावनम्रे, त्रिलोकावनम्रे, लसद्वृत्तगम्भीर–
नाभीसरस्तीरशैवालशङ्काकरश्यामरोमावलीभूषणे मञ्जुसम्भाषणे ।
चारुशिञ्जत् कटीसूत्रनिर्भर्त्सितानङ्गलीलाधनुः शिञ्जिनीडम्बरे, दिव्यरत्नाम्बरे ।
पद्मरागोल्लसन्मेखलाभास्वर श्रेणिशोभाजितस्वर्णभूभृत्तले, चन्द्रिकाशीतले ।२
विकसितनवकिंशुकाताम्रदिव्यांशुकच्छन्नचारूरुशोभापराभूतसिन्दूर
शोणायमानेन्द्रमातङ्गहस्तार्गले, वैभवानर्गले, श्यामले ।
कोमलस्निग्धनीलोत्पलोत्पादितानङ्गतूणीरशङ्काकरोदार जङ्घालते, चारुलीलागते ।

नम्रदिक्पालसीमन्तिनीकुन्तळस्निग्धनीलप्रभापुञ्जसञ्जातदूर्वाङ्कुराशङ्कसारङ्गसंयोगरिङ्खन्नखेन्दूज्ज्वले, प्रोज्ज्वले, निर्मले ।
प्रह्वादेवेश भूतेश तोयेश वाणीश कीनाश दैत्येश यक्षेश वाय्वग्नि कोटीर माणिक्यसंघृष्टबालातपोद्दामलाक्षारसारुण्यलक्ष्मीगृहीताङ्घ्रिपद्मे, सुपद्मे, उमे ।३
सुरुचिरनवरत्नपीठस्थिते, सुस्थिते। रत्नपद्मासने, रत्नसिंहासने,
शङ्खपद्मद्वयोपाश्रिते, तत्र विघ्नेशदुर्गावटुक्षेत्रपालैर्युते ।
मत्तमातङ्गकन्यासमूहान्विते । मञ्जुलामेनकाद्यङ्गनामानिते, भैरवैरष्टभिर्वेष्टिते ।
देवि वामादिभिः शक्तिभिः सेविते । धात्रिलक्ष्यादिशक्त्यष्टकैः संयुते ।
मातृकामण्डलैर्मण्डिते ।
यक्षगन्धर्वसिद्धाङ्गनामण्डलैरर्चिते । पञ्चबाणात्मिके । पञ्चबाणेन रत्या च सम्भाविते ।
प्रीतिभाजा वसन्तेन चाभिनन्दिते । भक्तिभाजां परं श्रेयसे कल्पसे ।
योगिनां मानसे द्योतसे । छन्दसामोजसा भ्राजसे । गीतविद्याविनोदादितृष्णेन कृष्णेन सम्पूज्यसे ।
भक्तिमच्चेतसा वेधसा स्तूयसे । विश्वहृद्येन वाद्येन विद्याधरैर्गीयसे ॥४
श्रवणहरणदक्षिणक्वाणया वीणया किन्नरैर्गीयसे ।
यक्षगन्धर्वसिद्धाङ्गनामण्डलैरर्च्यसे।
सर्वसौभाग्यवांछावतीभिर्वधूभिः सुराणां समाराध्यसे । सर्वविद्याविशेषात्मकं चाटुगाथासमुच्चारणं कण्ठमूलोल्लसद्वर्णराजित्रयं कोमलश्यामलोदारपक्षद्वयं तुण्डशोभातिदूरीभवत्किंशुकं तं शुकं लालयन्ती परिक्रीडसे ।
पाणिपद्मद्वयेनाक्षमालामपि स्फाटिकीं ज्ञानसारात्मकं पुस्तकं चाङ्कुशं पाशमाबिभ्रती येन सञ्चिन्त्यसे, तस्य वक्त्रान्तराद्गद्यपद्यात्मिका भारती निःसरेत् ।
येन वा यावकाभाकृतिर्भाव्यसे तस्य वश्या भवन्ति स्त्रियः पूरुषाः ।
येन वा शातकुम्भद्युतिर्भाव्यसे सोऽपि लक्ष्मीसहस्रैः परिक्रीडसे । किं न सिद्ध्येद्वपुः श्यामळं कोमळं चन्द्रचूडान्वितं तावकं ध्यायतः ।
तस्य लीलासरोवारिधिस्तस्य केलीवनं नन्दनं तस्य भद्रासनं भूतलं तस्य गीर्देवता किंकरी तस्य चाज्ञाकरी श्रीः स्वयम् ।
सर्वतीर्थात्मिके सर्वमन्त्रात्मिके सर्वतन्त्रात्मिके सर्वयन्त्रात्मिके सर्वशक्त्यात्मिके

सर्वपीठात्मिके सर्वतत्त्वात्मिके सर्वविद्यात्मिके सर्वयोगात्मिके सर्वनादात्मिके सर्वशब्दात्मिके सर्वविश्वात्मिके सर्वदीक्षात्मिके सर्वसर्वात्मिके सर्वगे, हे जगन्मातृके, पाहि मां पाहि मां देवि तुभ्यं नमो देवि तुभ्यं नमो देवि तुभ्यं नमः॥५